पञ्चबन्धः, पुं, (पञ्चमः बन्धः भागो यत्र ।) नष्टद्रव्यस्य पञ्चमांशदण्डः । यथा,—

"आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते ॥"

आगमेन रिक्थक्रयादिना । उपभोगेन च मदीयमिदं द्रव्यं तच्चैवं नष्टमपहृतं वेत्यपि । भाव्यं साधनीयं तत् स्वामिना । अतोऽन्यथा तेन स्वामिना अविभाविते । पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः । इति मिताक्षरा ॥

पञ्चभद्रः, पुं, (पञ्चसु अङ्गभेदेषु भद्रः शुभः पुष्पितत्वात् ।) पञ्चस्थानेषु पुष्पितोऽश्वविशेषः । यथा,—

"पञ्चभद्रस्तु हृत्पृष्ठमुखपार्श्वेषु पुष्पितः ॥"

इति हेमचन्द्रः ॥ पाचनविशेषः । यथा,—

"छिन्नोद्भवापर्पटवारिवाह-
भूनिम्बशुण्ठीजनितः कषायः ।
समीरपित्तज्वरजर्ज्जराणां
करोति भद्रं खलु पञ्चभद्रः ॥"

इति शार्ङ्गधरः ॥

पञ्चभूतं, क्ली, पञ्चानां भूतानां क्षित्यप्तेजोमरुद्व्योम्नां समाहारः । (केचित्तु संज्ञाप्रयुक्तत्वात् पञ्च च तानि भूतानि चेति कर्म्मधारयसमासमाहुस्तत्र तु एकवचनं चिन्तनीयम् ।)

अस्योत्पत्तिर्यथा ।

"अभूत्तस्मादहङ्कारस्त्रिविधः स्वधिभेदतः ।
वैकारिकादहङ्काराद्देवा वैकारिका दश ॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः ।
तैजसादिन्द्रियाण्यासंस्तन्मात्रा क्रमयोगतः ।
भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे ॥"

इति शारदायां प्रथमपटलः ॥ * ॥

"सोऽहङ्कारस्त्रिभेदः स्यात् सत्त्वादिगुणयोगतः ।
वैकारः सात्त्विको नाम तैजसो राजसः स्मृतः ॥
भूतादिस्तामसस्ते च पृथकतत्त्वाद्यजायत ।
वैकारिकाद्दिगाद्याश्च चन्द्रेणैकादश स्मृताः ॥
इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः ।
यच्चापरं मनस्तत्त्वं ससङ्कल्पविकल्पकम् ॥
तैजसादेव तन्मात्रमिन्द्रियाणि तथा दश ।
भूतादेः पञ्चतन्मात्राण्यासन् भूतमतः परम् ॥"

इति राघवभट्टधृतम् ॥ * ॥

"शब्दादिग्रामस्पर्शतस्तेन वायु-
स्ताभ्यां रूपादह्निरेते रसाच्च ।
अम्भांस्येतैर्गन्धतो भूर्धराद्या
भूताः पञ्च स्युर्गुणोनाः क्रमेण ॥"

इति प्रपञ्चसारे प्रथमपटलः ॥ * ॥

"आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः ।
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही ॥"

(तथा च श्रुतिः ।

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथ्वी समजायत ॥"

एतच्च व्यवलम्बनेन मनुनाप्युक्तम् । १ । २० । यथा,—

" आद्याद्यस्य गुणन्त्वेषामवाप्नोति परःपरः ।
यो यो यावतिथश्चैषां स स तावद्गुणः स्मृतः ॥"

अत्र कुल्लूकभट्टः ।

" आद्याद्यस्याकाशादेर्गुणं शब्दादिकं वाय्वादिः परः परः प्राप्नोति । एतदेव स्पष्टयति यो यः इति येषां मध्ये यो यो यावतां पूरणो यावतिथः वतोरिथुक् स स द्वितीयादिः द्वितीयो द्विगुणः तृतीयस्त्रिगुणः इत्येवमादिर्मन्वादिभिः स्मृतः । एतेनैतदुक्तं भवति । आकाशस्य शब्दो गुणः वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसाः भूमेः शब्दस्पर्शरूपरसगन्धा इति ॥)

तस्य लयप्रकारो यथा,—

"मही संलीयते तोये तोयं संलीयते रवौ ।
रविः संलीयते वायौ वायुर्नभसि लीयते ।
पञ्चतत्त्वाद्भवेत् सृष्टिस्तत्त्वे तत्त्वं विलीयते ॥"

इति ब्रह्मज्ञानतन्त्रनिर्ब्बाणतन्त्रे ॥ * ॥

तद्भवास्थ्यादि यथा,—

"अस्थिमांसनखाश्चैव नाड़ी त्वक् चेति पञ्चमः ।
पृथ्वीपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
मलं मूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च ।
तोयपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
हास्यं निद्रा क्षुधा चैव भ्रान्तिरालस्यमेव च ।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
धारणं चालनं क्षेपः सङ्कोचः प्रसरस्तथा ।
वायुपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥
कामक्रोधस्तथा लोभस्त्रपा मोहश्च पञ्चमः ।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम् ॥"

इति ब्रह्मज्ञानतन्त्रे प्रथमपटलः ॥ * ॥

पञ्चभूतनक्षत्राणि यथा,—

"धनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा ।
अभिजिच्चोत्तराषाढ़ा पृथ्वीतत्त्वमुदाहृतम् ॥
पूर्ब्बाषाढ़ा तथाश्लेषा मूलार्द्रा चैव रोहिणी ।
उत्तरभाद्रपदा तोयं आपस्तत्त्वन्तभीदृशम् ॥
भरणी कृत्तिका पुष्या मघा पूर्ब्बा च फल्गुनी ।
पूर्ब्बभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये ॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्व्वसुः ।
अश्विनी मृगशीर्षा च वायुस्तत्त्वमुदाहृतम् ॥"

इति स्वप्नस्वरोदयः ॥

पञ्चमं, क्ली, मैथुनम् । यथा,—

"भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये ।
तस्य नाम भवेद्देवि पञ्चमं परिकीर्त्तितम् ॥"

इति समयाचारतन्त्रे द्वितीयपटलः ॥

पञ्चमः, त्रि, पञ्चानां पूरणः । (पूरणे डट् ततः नान्तादिति मट् ।) पाँच इत्यादि भाषा । इति मेदिनी ॥ (यथा, मनुः । ८ । १२५ ।

"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥")

रुचिरः । दक्षः । इति हेमचन्द्रः ॥

पञ्चमः, पुं, पञ्चानां स्वराणां पूरणः । तन्त्रीकण्ठोत्थितस्वरविशेषः । इत्यमरः ॥ स तु षड्जादिसप्तस्वराणां पञ्चमः स्वरः । तस्योत्पत्तिर्यथा,—

"वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु ।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते ॥"

इति तट्टीकायां भरतः ॥ अपि च ।

"प्राणोऽपानः समानश्च उदानो व्यान एव च ।
एतेषां समवायेन जायते पञ्चमः स्वरः ॥"

इति सङ्गीतदामोदरः ॥ अस्य जातिः औड़वः । पञ्चस्वरमिलित इति यावत् । अस्य कूटतानाः विंशत्यधिकशतम् १२० प्रत्येकताने चत्वारिंशत् ४० । समुदायेन चतुःसहस्राष्टशतानि ४८०० ताना भवन्ति । अस्योच्चारणजातिः पिकः । उच्चारणस्थानं उरः गलः शिरश्च । व्याकरणमते अधरः । अयं विप्रवर्णः । इति सुद्धतानविवेकलक्षणम् ॥ अस्य रूपं इन्द्ररूपतुल्यम् । वर्णः श्यामः । स्थानं क्रौञ्चद्वीपम् । देवता महादेवः । वारो बृहस्पतिः । समयस्तुस्त्रिंशत्पलाधिकाष्टौ घटिकाः । श्रुतयश्चत्वारः चिति: रक्ता सन्दीपनी आलापिनी च । मूर्च्छनास्तिस्रः यमली निर्म्मली कोमली च । इति नादपुराणम् ॥ * ॥ रागभेदः । इति मेदिनी ॥ अयं कल्लिनाथमते सोमेश्वरमते च षड्रागाणां मध्ये तृतीयरागः । सोमेश्वरमते अस्य गानसमयः शरदृतुः प्रातःकालश्च । कल्लिनाथमते अस्य रागिण्यः षट् । यथा, त्रिवेणी १ स्तम्भतीर्था २ आभीरी ३ ककुभ् ४ वरारी ५ सावीरी ६ । सोमेश्वरमते तु विभासा १ भूपाली २ कार्णाटी ३ वड़हंसिका ४ मालश्रीः ५ पटमञ्जरी ६ । अस्मिन्रागे गान्धारस्वरस्तीव्रः । ऋषभपञ्चमौ स्वरौ लुप्तौ । षड्जस्वरः ग्रहांशन्यासाः । स च हनूमन्मते भरतमते च भैरवरागस्याष्टमपुत्त्रः । इति सङ्गीतशास्त्रम् ॥

पञ्चमकारं, क्ली, (पञ्चसंख्यकं मकारं तत्त्वं यत्र । मद्यं मांसमित्यादिषु आदौ मकारस्थितेस्तथात्वम् ।) मकारपञ्चकम् । पञ्चतत्त्वम् । तत्तु मुद्रामैथुनमद्यमांसमत्स्यरूपम् । यथा,—

"मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ।
मकारपञ्चकं देवि ! देवानामपि दुर्लभम् ॥"

इति गुप्तसाधनतन्त्रे ७ पटलः ॥ * ॥

"मद्यैर्मांसैस्तथा मत्स्यैर्मुद्राभिर्मैथुनैरपि ।
स्त्रीभिः सार्द्धं महासाधुरर्च्चयेद्जगदम्बिकाम् ॥
अन्यथा च महानिन्दा गीयते पण्डितैः सुरैः ।
कायेन मनसा वाचा तस्मात्तत्परो भवेत् ॥"

इति कामाख्यातन्त्रे ५ पटलः ॥ * ॥

"या सुरा सर्व्वकार्य्येषु कथिता भुवि मुक्तिदा ।
तस्या नाम भवेद्देवि ! तीर्थं परमं सुदुर्लभम् ॥
शूद्राणां भक्ष्ययोग्यानां यन्मांसं देवनिर्म्मितम् ।
वेदमन्त्रेण विधिवत् प्रोक्ता सा शुद्धिरुत्तमा ॥
भक्ष्ययोग्याश्च कथिता ये ये मत्स्या वरानने ! ।
ते रहस्ये मया प्रोक्ता मीनाः सिद्धिप्रदायकाः ॥